PratyabhiVi.ii.10.4 (ii.1.2); **2A** to take out, to extricate व्रणे रोहति चैकैकं शनैर्वालमपक्षिपेत् SuśruS. iv.2.71; **2B** to refute, to exclude नित्येति क्षयितालक्षणं दुःखमुपक्षिपति (v.l. अपक्षिपति) Bhām. 60.12 (*on* i.1.1) (NSP. Ed.); द्वितीयं पक्षमपक्षिपति 'नापि दोषापनयनेने' ति Bhām. 95.17 (*on* i.1.4); **2C** to remove नीवीस्पर्शे सुहृल्लेखमपक्षिपति तत्करम् BhāvPra. (Śā.) 116.17 (5); (pass.) to be removed निगमनेऽपि हेत्वनुवादेन तस्मादेव नान्यस्मादिति सिद्धसाधनतापक्षिप्यते NyāySu. (Ja.) 263B.2. (*on* ii.1.2); **3** to blame अस्यैव च दुरात्मनः कृतघ्नस्य कृते(?)रपरभवनाद्वारस्थगळग्रहाननुभवन्ति ... गुरूनपक्षिपन्ति ... दुर्मतयः AvantiKa. 41.3; **4** to put or sing in low pitch cf. **अपक्षेपिन्** ; *adj.* (*f.*) (used as noun) (girl) who is throwing away उदकाञ्जलिं निनयेत्याह। प्राचीनमपक्षिपन्त्यां कल्याणम् KauśiSū. 37.12

अपक्षिप्त (apakṣipta) *adj.* **1** set aside, refuted, excluded एतेनानुमानादिज्ञानमपक्षिप्तं भवति NyāyVār. 42.18 (*on* i.1.4); **2** censured, blamed भूमिदानमपक्षिप्तं तद्रतं प्रणिपीडनात्। प्राणिघातनिमित्तेन पुण्यं पाषाणतः पयः PadmP. (Ra.) 14.75; द्विजः ... नाक्षिप्तोऽपि विरज्येत (v.l. नापक्षिप्तोऽपि भाषेत) Vedavyāsm. 1.28; **3** thrown away, thrown down अपक्षिप्तस्य मुसलस्यान्त्येन कर्मणा उलूखलमुसलसमवेतो मुसलस्योत्पतनहेतुः संयोगः क्रियते NyāyKa. 299.20.

अपक्षिभाव (apakṣi-bhāva) *m.* the state or condition of being a non-bird कपोतरूपिणं प्राप्तं हिमवत्कन्दरेऽनलम्। अपक्षिभावसंक्षुब्धम् RasRaSa. 1.63.

अपक्षी (apa-kṣī) IV.U. [it is not recorded in the Dhātupāṭhas; also it is shortened in the present system by P.vii.3.80; P.vi.4.49; according to MW. क्षी is derived from क्षीण; Dhātupātha xxxi.35; Palsule [Dhātupāṭha] justifies the root क्षी to explain the forms like क्षीयते] to wane, to decrease, to reduce TaiS. III. v.1.4 यत् पौर्णमासीं पूर्वामालभेत प्रतिलोममेनावालंभेतामुमपक्षीयमाणमन्वपक्षीयेत तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयन्ति ŚatBr. XIV. ix.1.19; देवाः ... प्रातर्भक्षयिष्यन्तस्तमेतद्भक्षयन्ति यदपक्षीयते ŚatBr. (K.) I.iii.4.9; असौ योऽपक्षीयति। स सर्वेषां भूतानां प्राणैरपक्षीयते TaiĀ. i.14.2; षड्भावविकारा भवन्ति ... जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते Nir.1.2 (29.6); असौ योऽस्तमेति। असौ योऽपक्षीयति। एष हि देवः प्रदिशोऽनुसर्वाः पूर्वो हि जातः स उ गर्भे अन्तः SūryaTāU. 1.10; स्वयोन्यन्नागमे हि शरीरमुपचीयते, अन्नमयत्वात्, विपर्यये अपक्षीयते पतति BṛĀraUBh. 275.1 (*on* ii.2.1); यथा सोमं राजानमिह ऋत्विजः आप्यायस्व अपक्षीयस्वेति भक्षयन्ति BṛĀraUBh. 782.7 (*on* vi.2.15); न अपक्षीयते स्वरूपेण, निरवयवत्वात् GītāBh. (Śaṅ)33.18 (*on* 2.20); यो ह्याशाश्वतः सोऽपक्षीयते KaṭhUBh. 132.18 (*on* 2.18); नैव प्रत्यग्जायते वर्धते नो किञ्चिन्नापक्षीयते नैव नाशम् SarvaVeSāSaṁ. 459; **2** to die यदि सत्रेऽपक्षीयेत मुख्यः सामायिकः सामयिकान्यतमः पूर्ववमुख्यसामयिकत्वेन वरणम् PārāSū. 70.18.

अपक्षी (apakṣī) IX.Ā. to wane, to decrease, to reduce मास्माकं प्राणेन प्रजया पशुभिरपक्षेष्ठाः ŚāṅkhāĀ. 4.9 (16.8); मा ममं प्राणैरपक्षेष्ठाः TaiĀ. i.14.2.

अपक्षीकृत (a-pakṣīkṛta) *adj.* (used as noun) (that) which is not made as subject शाखाभङ्गजशब्दानाम् ... यद्यपक्षीकृतानामपि कारणान्तरादनित्यत्वं भवति कामं भवतु TātpaṬ (Vā.) 687.11 (*on* v.1.28); असिद्धिर्दोष एव न त्वपक्षीकृतस्येति TārkiRa. 280.7.

अपक्षीण (apa-kṣīṇa) *adj.* **1** passed, expired कृते युगे ह्यपक्षीणे लुप्तो धर्मः सनातनः LaViṣṇuSm. 1.2; **2A** decreased, declined, reduced असमर्थावावामपक्षि(?क्षी)णं जलचरं त्वां सह नेतुम् Pañcā. 85.17; **2B** decayed, destroyed न हि गृहदाहविप्लुष्टस्य ध्यानादेरिव वा अपक्षीणस्य तस्यास्ति नाशव्यवहारः GoviBh. 296.1 (*on* iv.1.16)

अपक्षीय (apakṣī-ya) *ger.* **A** having destroyed अप क्षीय दुरितम् अहम् अप रक्षांसि तेजसा AV. (P.) v.14.6; **B** having waned आपः परस्य जेर् अयः स्याद्वा यपि (v.l. अपक्षीय) MugdhaBo. 26.216 (293.21)

अपक्षीयमाण (apa-kṣīyamāṇa) *adj.* **1** waning, decreasing or reducing यत् पौर्णमासीं पूर्वामालभेत ... अमुमपक्षीयमाणमन्वपं। क्षीयेत TaiS. III.v.1.3; संस्थिते गोष्टोमे पौर्णमासं निर्वपन्ते, ते तमपक्षीयमाणं पौर्णमासेन यन्ति PañcBr. xxv.10.8; ते तमापूर्यमाणं ते तमपक्षीयमाणमिति च कृत्स्नवत्पक्षाभिधानम् Lāṭyā-ŚS. x.16.2; अवयवोपगमापगमाभ्यां ह्यनिशमापूर्यमाणस्यापक्षीयमाणस्य च जीवस्य विक्रियावत्त्वम् BrahmSūBh. (Śaṅ.) 407.12 (*on* ii.2.35); अपक्षीयमाणमात्मबलं च निरीक्षितुमपि अतितिक्षवः ... महासुराः NīlaVi.20.18; (used as noun) (that) which is waning, decreasing or reducing तस्मात्पञ्चदशापूर्यमाणस्य रूपाणि पञ्चदशापक्षीयमाणस्य ŚatBr.X.iv.2.17; तस्यैषा परिचक्षा यदपक्षीयमाणे सुत्यां गच्छन्ति JaimiBr.2.373; आपूर्यमाणे उदधिः स्वत एवाभिपूर्यते। ततोऽपक्षीयमाणेऽपि स्वात्मनैवापकृष्यते VāyuP. i.49.127; **2** being deprived, being lost गुरुणाभिमृता अन्यतोऽवापक्षीयमाणा अमावास्यायां शान्तिकर्म कुर्वीरन् ĀśvaGS. iv.6.1; **3** passing (time) स खल्वेतं पक्षमपक्षीयमाणः पक्षमनधीयानं उपश्राम्येता दर्शात् KauśiSū. 139.13.

अपक्षीयमाणपक्ष (apakṣīyamāṇa-pakṣá) *m.* dark-half of the waning (moon) या अपक्षीयमाणपक्षस्य रात्रयस्ताः सर्वा अमावास्यां समवयन्ति ŚatBr. XI.i.7.4; अथ ये यज्ञेन ... लोकं जयन्ति ते धूममभिसंभवन्ति ... रात्रेरपक्षीयमाणपक्षम् ŚatBr. XIV. ix.1.19; तमेतमपक्षीयमाणपक्षं पौर्णमास्येन यन्ति ŚāṅkhāŚS. xiii.29.9; आर्तिजान्यग्न्याधेयानि व्याख्यास्यामः ... विपक्षेऽपक्षीयमाणपक्ष इति BaudhŚS. iii.200.12; iii.200.15; ततः अपक्षीयमाणपक्षम् अपक्षीयमाणपक्षदेवताम् ... प्रतिपद्यन्ते BṛĀraUBh.782.3 (*on* vi.2.15)

अपक्षीयमाणपक्षदेवता (apakṣīyamāṇapakṣa-devatā) *f.* deity of the dark half of the waning (moon) ततः ... अपक्षीयमाणपक्षदेवताम् ... प्रतिपद्यन्ते BṛĀraUBh. 782.3 (*on* vi.2.15)

अपक्षीयमाणपक्षदीक्षित (apakṣīyamāṇapakṣa-dīkṣita) *adj.* initiated in the dark half of waning (moon) अपक्षीयमाणपक्षदीक्षितोऽनुकल्पेन परिचरेदादशम्याः PārāSū. 15.10

अपक्षुध् (apa-kṣudh) *adj.* [from *apa-kṣudh-*] **1** hunger नित्यम् ... अपक्षुधमन्नपानम् ... इति कुम्भदासीनां लाभातिशयः KāmSū.6.5 (348.3); अन्नमपक्षुधमुक्तम् ... इत्थं लाभातिशयो ज्ञातव्यः सर्ववेश्यानाम् KandaCū. vi.5.23; **2** word or expression *apakṣudh* अपक्षुधमिति अकदर्थितत्वात्क्षुधमपनयति JayaMa. 348.6 (*on* 6.5)

अपक्षुध (apa-kṣudha) *adj.* [from *apa-kṣudhā*, VIŚVA] which removes hunger प्राच्यै त्वा दिशे निर्वपामि शतधारम् अपक्षुधम् AV.(P.)xvi.93.1-10; xvi.94.1-7; xvi. 95.1-9.

अपक्षेप (apa-kṣepa) *m.* **1A** foul throw (in gambling) यतो वा शक्नुयाद् आक्षिकवदपक्षेपेणास्य प्रहर्तुम् ... ततो वा गच्छेत् ArthŚā.iii.175.8 (12.5); **1B** act of throwing downwards (as one of the five motions) उत्क्षेपणमपक्षेप आकुञ्चनमथापरम्। ... भिद्यते कर्म पञ्चधा TārkiRa.157.6; **2** destruction नाल्पं महद्वापक्षेपोपायज्ञस्य NītiVā.10.152 (comm. अपक्षेपशब्देन विनाशः कथ्यते); **3** rejection, disdain वल्लभस्य आयासनमपक्षेपेण ... ईर्ष्यारोषाभिव्यञ्जकम् Kāvyānu. (He.) 138.17.

अपक्षेपण (apa-kṣepaṇa) *n.* **A** act of throwing down (as one of the five motions) उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि PadārthaSaṁ. 11.3; तद्विपरीतसंयोगविभागकारणं कर्मापक्षेपणम् PadārthaSaṁ. 291.17; 292.16; अधोदेशसंयोगकारणमूर्ध्वदेशविभागकारणं कर्मापक्षेपणम् NyāyKa. 291.19; LaKṣaṇā. 12.7; कर्म ... तच्चोत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्चधा TarkBhā. (Ke.) 75.12; SarvaDaSaṁ. 10.73; TattvPrakā. 97B.4 (*on* ii.2.11); TarkKau. 1.11; अधोदेशसंयोगहेतुः कर्मापक्षेपणम् TarkKau. 20.4; TarkSaṁ. (A) 60.13; तच्च पञ्चधा भिद्यते उत्क्षेपणमपक्षेपणमाकुञ्चनम् ... चेति SarvaDaKau. 59.3; Yatindra Dī.34.11; TarkSaṁ.(A).5.16; ततो हस्तमुसलयोरधोदेशसंयोगहेतुभूता क्रिया जायते तदपक्षेपणम् SarvaDaKau.60.9; उत्क्षेपणं ततोऽपक्षेपणम् BhāṣāPa.6; **B** act of letting or bringing limb downwards गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः। प्रायः सर्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् AṣṭāHṛ. i.12.7 (comm. अङ्गस्य अधोनयनम्)

अपक्षेपणकर्मन् (apakṣepaṇa-karman) *n.* act of letting or bringing down हस्तमुसलयोर्युगपदपक्षेपणकर्मणी भवतः NyāyKa. 299.19.

अपक्षेपणत्वादि (apakṣepaṇatvādi) *adj.* the state of being the act of throwing down etc. एवमपक्षेपणत्वादीनां लक्षणं कर्तव्यम् SarvaDaSaṁ. 10.76.

अपक्षेपणरूप (apakṣepaṇa-rūpa) *adj.* [*f.* –ā] of the form of an act of throwing down क्रिया उत्क्षेपणापक्षेपणाकुञ्चनप्रसरणगमनरूपा: अनित्याश्च NyāySu. (Ja.) 337B.9 (*on* ii.2.6); पूर्वोत्तरे उत्क्षेपणापक्षेपणरूपाः क्षणाः क्रियाक्षणाः Bhāsk. ii.10.14 (*on* ii.1.2)

अपक्षेपणशून्य (apakṣepaṇa-śūnya) *adj.* devoid of the act of bringing downwords (अन्धकारेऽथ याने च गतिः कार्या ... भूमौ विसर्पितैः पादैः) विसर्पितैरपक्षेपणशून्यैः AbhinBhā. ii.150.22 (12.87)